# ॥ तृतीयोऽध्यायः ॥

## महोपाध्याय - श्री विनयसागरसूरयः ।

(व्यक्तित्वं कर्तृत्वं च)

### (अ) महोपाध्याय श्री विनयसागरजी महाभागानां इतिवृत्तम् ।

विक्रमस्य षोडशशतके महाराज्ञा खेङ्गारेण कच्छप्रदेशस्य राज्यधुरां स्वहस्ते धारयित्वा महता प्रयत्नेन राज्ये शान्तिर्व्यवस्था च स्थापिते । तस्य महानुभावस्य प्रयत्नबाहुल्येन तत्पुत्रो महारावो भारमल्लः खिस्ताब्दस्य १५८५ तमे वर्षे राज्यसिंहासने समुपवेशितः । तस्मिन्काले केवलं जाम रावलस्य (जामनगरस्य भूपतेः) हम्मीरस्यैव महानुपद्रवोऽभवत् येन सह कुलशत्रुताऽऽसीत् । खेङ्गारेण स्वदुहितां मुस्लिमधर्मिणे नृपाय विवाहि रूपेण दत्ताऽथ च मुस्लिम धर्मिप्रजाभ्योऽपि महारावः भारमल्लः चिन्तारहितः कृतः । अतो १६३१ खिस्ताब्दे पर्यन्तस्य समयः भारमल्ल कृते राज्यशासने साहित्यिक-धार्मिक प्रवृत्तिभिः अतीव प्राणवानासीत् । अत एव कच्छप्रदेशे एका देशोक्तिः अद्यापि प्रचलति यत्-खेङ्गारेण श्रमः कृतः भारेण फलानि भुक्तानि (१) इति । अद्यापि यदा यदा पितुः परिश्रमेण पुत्रो निष्कण्टकं फलं भुङ्क्ते तदा कच्छदेशीयाः जनाः इमामुक्तिं वदन्ति बहुशः ।

अस्य भारमल्लस्य राज्यशासनकाले अनेके ओशवालज्ञातीयाः जैनवणिक्जनाः व्यापारार्थं न्यवसन् । तैः सह परिचयेन महारावो भारमल्लः किल जैनधर्मेऽनुरक्तो जातः । कच्छप्रान्तीया जैनवणिग्जनाः कमपि जैनमुनिवर्यं चातुर्मासनिवाासार्थमाह्वयितुं धर्मोपदेशेन च संभावयितुं विचारविमर्शम्कुर्वन् । यतः धर्मगुरूणां पवित्रवचनानि, निष्पापान्याचरणानि, दर्शनं, श्रवणं च यदि जना न प्राप्नुयुः तदा जनानां धर्मविषये श्रध्धालोपोऽवश्यं जायेत, अधर्मविषये च प्रवृत्तिर्भवेदेव । अतस्तैर्वणिग्जनैः अचलगच्छेश्वर श्रीधर्ममूर्तिसूरयः सम्प्रर्थिताः । तेषां प्रार्थनां स्वीकृत्य वयसा-अल्पीयांसः किन्तु बुद्ध्या प्रतापेन च प्रौढाः श्रीकल्याणसागरसूरयः कच्छदेशं गन्तुमाज्ञापिताः । तैर्महानुभावैः भद्रावत्यां धर्मोपदेशेन समग्र कच्छीयजैनसमाजे जागरुकत्वं व्यधात् । तेषां महानुभावानां एतादृशफलस्वरूपेण जैनसमाजः आध्यात्मिकभावनाया धार्मिकश्रद्धायाश्च बीजवपन-फलमनुभूतवान् (२)

तदनन्तरं १५९५ तः १५९६ खिस्ताब्द पर्यन्तं, ततश्च १५९८ तमे वर्षे यदा आचार्य-श्रीकल्याणसागरसूरिमहाभागाः कच्छप्रेदेशे समागतास्तदा तैर्महाभागैः वातरोगप्रपीडितो भारमल्लः अभिमन्त्रितजलेन रोगमुक्तः कृतः । (३) तथा च तस्मै जैनधर्मप्रतिबोधः कारितः । महारावभारमल्लस्य पुत्रो भोजमल्लः संस्कृतभाषानुरागी सञ्जातः । अतः संस्कृतभाषायाः अभ्यासः व्याकरणाध्ययनञ्च सरलतया भवेतमिति हेतुना श्रीकल्याणसूरिमहाभागाः स्वशिष्यं महोपाध्यायश्रीविनयसागरं महारावे श्रीभोजमल्लसान्निध्ये स्थापितवन्तः । श्रीविनयसागरेण च भोजमल्लः सारस्वतव्याकरणमध्यापितः । पश्चाच्च कालक्रमेण यदा

भोजमल्ल: राज्यशानमलङ्कृतवान् , (४) तदा व्याकरणस्य अभ्यास: सततं भवेदिति विचिन्त्य भोजमल्लस्य संस्कृतभाषा-व्याकरणानुरागं तोषयितुं भोजव्याकरणं महोपाध्याय श्रीविनयसागरेण विरचितम् (५) भोजमल्लमध्यापयितुं रचितमिदं व्याकरणं भोजव्याकरणमिति संज्ञां लेभे ।

अचलगच्छाधिपते: श्रीधर्ममूर्तिसूरे: शिष्यसमुदायेषु -

(१) रत्नसागर: (२) विनयसागर: (३) उदयसागर: (४) देवसागर: (५) सौभाग्यसागर: (६) लब्धिसागर: (७) सुरसागर: इत्येते सप्त महोपाध्याया: परिगणिता: विद्यन्ते (६) ते एते श्रीकल्याणसागरजीसूरे: शिष्यसमुदाये समाविष्टा: । महोपाध्याय श्रीविनयसागरसूरि: श्रीमतो रत्नसागरमुने: द्वितीयक्रमेण पट्टावल्यां पठ्यते ।

महोपाध्यायश्रीविनयसागर: गूर्जरप्रान्ते अहमदाबाद नगरस्य वास्तव्य: श्रीमालवणिक्ज्ञात्युत्पन्न: आसीत् । तस्य पितुर्नाम "**भीमा**" एवं मातुर्नाम "**नाकु**" इत्यासीत् (७) विक्रमसंवत्सरस्य १६४४ तमे वर्षे फ़ाल्गुनमासस्य शुक्लद्वितीयायां रविवासरे श्रीभीमामहोदयेन सुमतिनाथबिम्बं रचयितम् इत्युल्लेखो धर्ममूर्तिसूरे: प्रतिष्ठालेखे वर्तते । महोपाध्यायस्य पदवी विनयसागरेण धर्ममूर्तिसूरे: काले एव सम्प्राप्ता प्रतिभाति । अचलगच्छाधिपते: श्रीकल्याणसागरसूरे: समये स: (विनयसागर:) आचार्यपदमारुढवान् । (८) अत: तस्य समय: ख्रिस्ताब्दस्य षोडशशताब्दी निश्चीयते ।

महोपाध्याय श्रीविनयसागरस्य क्रमो द्वितीय:, अथ च देवसागरस्य समय: ख्रिस्ताब्दस्य सप्तदशशतकस्य पूर्वार्ध: वर्तते, तस्य क्रम: चतुर्थोऽस्ति । अतो ख्रिताब्दस्य १८८५ तमे वर्षे महोपाध्याय-रत्नसागरस्य दीक्षाग्रहणानन्तरं श्रीभीमामहोदयेन विक्रमसंवत्सरे १६४४ (ख्रिस्ताब्दे: १५८८) तमे वर्षे सुमतिनाथबिम्बं रचयितम् । तस्मिन्नेव समये, तत्पश्चात् वा विनयसागरस्य दीक्षाग्रहणकाल: निश्चितुं पार्यते । महोपाध्याय-श्रीविनयसागरेण अचलगच्छाधिपतिं कल्याणसागरसूरिं स्वगुरुत्वेन, आत्मानं च तस्य शिष्यत्वेन स्वीकृत: इत्यनेकेषु स्थलेषु सूचितम् । महोपाध्याय-विनयसागरस्याऽभ्यासार्थे एव श्रीमताकल्याणसागरसूरिणा लिङ्गनिर्णयकोश: रचित: । (९)

संवत् १६७७ तमे वर्षे खम्भात नगरत: भुजप्रदेशस्थितं गच्छाधिपतिं कल्याणसागरसूरिं प्रति लिखिते महोपाध्यायदेवसागरस्य पत्रे विद्यते यत् - महोपाध्यायश्रीविनयसागरस्य कीर्ति: पाणिनीयव्याकरणस्य विद्वत्त्वेनापि प्रसृता आसीत् । यत्र पाणिनीयव्याकरणस्य एवं फणे: पतञ्जले: भाष्यादिग्रन्थानां महाख्याता, तर्कशास्त्रे (न्यायशास्त्रे) कुशाग्रबुद्धिमान्, उत्तमपुरुषेषु प्रथम: विनयसागर: नाम मुनि: ---

**पाणिनीय फणिभाषितादिषु ग्रन्थराशिषु महोपयोगभाक् ।**
**तर्कतीक्ष्णमतिसत्तामग्रणीर्लब्धवर्ण विनयोदधिर्मुनि: ॥**

इत्युल्लेखो विद्यते ।

## (आ) महोपाध्याय विनयसागरविरचितग्रन्था: ।

संवत् १७०२ (ख्रिस्ताब्धस्य १६५६) तमे वर्षे रचित: '**अनेकार्थरत्नकोश:**' अपरनाम '**अनेकार्थनाममाला**' वर्तते । ग्रन्थेऽस्मिन् हिन्दीभाषाया: शब्दानां संग्रहो वर्तते । अयं ग्रन्थ: त्रिष्वधिकारेषु विभक्तो विद्यते, एवं १६९ श्लोका: सन्ति।

"**हिङ्गुलप्रकर**" नाम ग्रन्थस्य रचना संवत् १७०० (ख्रिस्ताब्दस्य १६५४) तमे वर्षे कृताऽस्ति । हिङ्गुलशब्दस्यार्थ: हिङ्गु, गुर्जरभाषायां "**हिंग**" इति वर्तते । तस्योपयोग: खाद्यपदार्थेषु कर्तुं कतिपया: प्रक्रिया: साधना: वा क्रियन्ते इति प्रदर्शितम् । अत्र च तात्त्विकाध्यात्मिकं साधनां प्रदर्शयन् हिंङ्गुलशब्दस्यार्थ: रूपकेण मन: इति प्रस्तुत: । यत: तस्मिन् द्वात्रिंशत् (३२) प्रक्रमा: सन्ति । प्रत्येकस्मिन् प्रक्रमे चत्वारि तदधिकानि वा अनुष्टुप् छन्दोबद्धानि पद्यानि सन्ति । तत्र प्राणातिपाद: मृषावाद:, क्रोध: इत्यादि अष्टादश पापस्थानानि, द्युतादीनि सप्त व्यसनानि, दानशीलतपोभावा: इति चत्वारो धर्मा:, अन्ते च जिनेन्द्रपूजा-गुरुपूजा, उद्यमसाधना, योगसम्बन्धिनी चर्चा वर्तते ।

विक्रमसंवत् १८७४ (ख्रिस्ताब्दस्य १८१८) तमे वर्षे - शक संवत् १७३९ फाल्गुनमासस्य शुक्लपक्षे षष्ठयां तिथौ शुक्रवासरे विद्वच्चिन्तामणिग्रन्थस्य या प्रतिलिपि: कृता तस्या: हस्तप्रतं वर्तमानाचलगच्छाधिपति-श्रीकलाप्रभसागरसूरि सकाशात् प्रतिकृति: (झेरोक्ष) रूपेण सम्प्राप्ता ।

भोजव्याकरण प्रस्तावनायां (पृ. १२)

हस्तप्रतवर्णनमेवमस्ति-

**भोजव्याकरणप्रस्तावनायां पृष्ठम् -**

पृष्ठसंख्या - ५ + १/२ ।

परिमाणम् - ११ x २२ सेन्टीमीटर ।

प्रतिपृङ्क्तय: - १३ ।

अक्षराणि (प्रतिपङ्क्ति)- ३३ ।

श्लोकसङ्ख्या - १२६ ।

अक्षराणि अतीव सुन्दराणि व्यवस्थितानि च सन्ति । अङ्कानामुपरि रक्तवर्णं चिह्नं वर्तते । लेखकस्य नाम संशययुक्तं भाति । यत: केवलं **शान्तिनाथस्य कृपया** इत्यल्पमेव लिखितं पठ्यते । अयं ग्रन्थ: भोजव्याकरणस्य रचनाया: पश्चात्कालीन: वर्तते, यतो भोजव्याकरणस्य रचनासमये विनयसागरश्रीमहोपाध्याय: आसीत्, किन्त्वस्य विद्वच्चिन्तामणिग्रन्थस्य पुष्पिकायाम् आत्मानम् आचार्यत्वेन अवर्णयत् । (१०) विषयानुसारेणापि अयं ग्रन्थ: भोजव्याकरणस्य सहायकग्रन्थ: ज्ञायते । अत्र सारस्वतसूत्रानुसृतं भोजव्याकरणं रचितं, तस्येव सूत्रपाठ: पद्यरूपेण प्रस्थापयितुं प्रयास: कृतो वर्तते । येन विद्यार्थिनां अध्ययने सौकर्यं प्राप्येत ।

सारस्वतसूत्राणां प्रकरणानि एवं तेषु सूत्रेषु निर्दिष्टविषयाणां सूत्रसङ्ख्यया सह तैः महाभागैः अनुष्टुप् छन्दसि एवं आर्याछन्दसि पद्यानि विरचितानि। अत्र सूत्राणां अक्षरप्रमाणविषये यत्र यत्र शङ्का, समुद्भवेत् तत्र तत्र अष्टाक्षरसूत्रमिदं, पदविषयकसंदिग्धतानिरसने द्विपदमिदं इति स्पष्टता वर्तते। (११)

ग्रन्थेनानेन सह सारस्वतप्रक्रियायाः भोजव्याकरणसूत्राणां च तुलना यदि क्रियेत तर्हि स्पष्टं ज्ञायते यत् सारस्वत्यारकरणस्य प्रक्रियायाः साहाय्येन महोपाध्याय श्रीविनयसागरेण भोजव्याकरणं विरचितम्। किन्तु सूत्रपाठस्याध्ययनेन विना प्रक्रियाग्रन्थे साफल्यं न प्राप्यते इति दृढं मत्वा सूत्रपाठोऽपि तेन प्रदत्तः। महोपाध्याय श्रीविनसागरेण गणपाठः धातुपाठश्च स्वतन्त्रग्रन्थरूपेण विरचितौ न वेति अद्ययावत् आसङ्गतमेव। सारस्वतव्याकरणस्योपरि तस्य कार्यमसम्पूर्णं भाति। यद्यपि गणपाठः धातुपाठश्च विनयसागरेण स्वकीयेभोजव्याकरणे तत्तस्थलेषु अन्तर्गृहीतावेव।

वसन्ताख्यं हिन्दीकाव्यं,(१२) पञ्चप्रतिक्रमणसूत्रेषु विनयः,(१३) अचलगच्छ,(१४) कल्याण। (१५) इत्येतानि नामान्यपि पठ्यन्ते। किन्तु पद्य-६ तमे चतुर्थपदस्य विचारविमर्शे कृते अस्य ग्रन्थस्य अनुवादकः प्रमाणयति यद् विनयसागररचितं **वसन्त-पद्यं** संवत् १९०५ (ख्रिस्ताब्दस्य १८४९) तमे वर्ष अचलगच्छाधिपति मुक्तिसागरसूरिशिष्येण विनयसागरमुनिना विरचितं भाति। अचलगच्छदिग्दर्शनस्य ५३२ तमे पृष्ठे लिखितं वर्तते यत् - पालिताणा नगरे नरसीनाथस्य धर्मस्थापत्येषु धर्मशाला, एवं श्रीचन्द्रप्रभोः जिनालयं मुख्यं वर्तेते। १७०५ तमे वर्षे वैक्रमाब्दे माघशुक्ल ५ चन्द्रवासरे मुक्तिसागरसूरेरुपदेशान्..... इति विनयसागर रचिते पद्यस्य चतुर्थे पदे सुस्पष्टमेव। (१६)

## महोपाध्यायश्री विनयसागरविरचितं भोजव्याकरणम्।

महोपाध्याय श्रीविनयसागरेण षोडशे ख्रिस्ताब्दशतके महाराजभारमल्लात्मजस्य राज्ञो भोजमल्लस्य अध्ययनहेतोः सन्तोषार्थं च भोजव्याकरणं विरचितमिति असकृत्स्पष्टं निर्दिष्टम्। ग्रन्थेऽस्मिन् वारंवारं भोजमल्लस्य नामाल्लेखः भोजः,(१७) भोजराजेन्द्रः,(१८) भोजभूपः,(१९) कच्छभूपतिः,(२०) कच्छेश्वरः,(२१) कच्छजनपदाधीशः,(२२) कच्छजनपदप्रभुः(२३) इत्यादिभिः पदैः कृतः तथा च शुद्धधर्माचरणार्थं भोजमल्लनृपो दृढरुपेण "शुद्धधर्मश्च कर्तव्यः करणीयस्त्वया प्रभो-"(२४)इति अनुरुद्धः। एतेन महाराजभोजमल्लस्य महोपाध्यायश्रीविनयसारगस्य चात्मीयता गरुशिष्यत्वं च प्रकटीभवतः। महोपाध्यायश्रीविनयसागरस्य भोजव्याकरणे सारस्वतसूत्रप्रक्रियानुसारणैव वृत्तित्रयं दृश्यते। प्रथमवृत्यारंभे लोकेशो ब्रह्मा (२५), द्वितीयवृत्त्यारम्भे श्रीधरः, विष्णुः (२६), ततश्च तृतीयवृत्त्यारम्भे शम्भु-शिव (२७) मङ्गलादीनि शास्त्राणीति (२८) समयानुसरेण प्रणताः वर्तन्ते। यद्यपि मुम्बापुरीय आर्यजयकल्याण प्रकाशनकेन्द्र प्रकाशितावृत्तौ प्रस्तावनायां (२९) अनुदितेचांशे(३०) लोकेशपदस्य शम्भुपदस्य चार्थः भगवन्नादिनाथः इति श्रीधरपदस्य चार्थः श्रीगौडीपार्श्वनाथः इति गृहीतः।

# पादटिप्पणी

(१) खाटियो खेङ्गार भोगवियो भार" ॥

(२) १५९४ त: १५९५ ख्रिष्टाब्दपर्यन्तम् ।

(३) लिङ्गनिर्णय: संस्कृतशब्दकोशश्च, प्रस्तावना, पृष्ठ - १४ ।

(४) १६३१ त: १६४५ ख्रिष्टाब्दपर्यन्तं तस्य शासनकाल: ।

(५) प्रणम्य लोकेशमनन्तशक्तिं श्रीशारदाया वचनप्रसादात् ।
श्रीभारमल्लात्मज भोज तुष्ट्यै विरच्यते व्याकरणं सुपचै: ॥ (१, १.१) ॥

(६) (अ) पार्श्व: अचलगच्छ दिग्दर्शन, पृ. ३६१ ।
(ब) आर्य कल्याणगौतमस्मृतिग्रन्थ:, पृ. १०४ ।

(७) "श्रीश्रीमालकुले श्रीमान् भीमाह्वस्तस्य नन्दन: ।
विनयसागर: ख्याति नाकुसूनु: सुतद्धितम् ॥ (१,१८-१.)

(८) अचलगच्छक्रमेण दीक्षावसरे मुनि: साधु: वा तदनन्तरं गणि:, उपाध्याय: आचार्य: गच्छाधिपतिरिति पदवी दीयते वर्तमानगच्छाधिपति-श्रीकलाप्रभसागरसूचनं साभारं स्वीक्रियते ।

(९) अचलगच्छदिग्दर्शनम्, पू. ४०७ ।

(१०) सारस्वतस्य वक्तव्या/न्युदाहरण संयुतै: ।
विनयसागराचार्यै/रलेखिषत सत्वरम् ॥

(११) विशेषस्तु द्रष्टव्यम् परिशिष्टम् - १ ।

(१२) शेठ लालशी पुनशी, पञ्चप्रतिक्रमणसूत्राणि - १९३० पृ - ४०९-४१४

(१३) विनय नमत तुम बन्दा (१-४)

(१४) विनय भजत अचल थानसे । (११-३)

(१५) दिक्षा केवल ज्ञान कल्याणक (१७-५)

(१६) ओगणीस पांच माघ शुदि पञ्चमी ।
सोमवार सुखकारी "
जरकउ बंदिर संघ मिलत बहु ।
ओच्छव हुओ उदारि ।
थापना भई मनुहारि (पृ. ४११)

(१७) इतरत् कतरत् कतमत् तथाऽन्यतरदेव भोज ।
आदिग्रहणात् सूत्रे ग्राह्या रुपाणि सर्ववच्चैषाम् ॥

(१८) प्राक्कविभिस्तु यत्रैव प्रोक्तास्तत्रैव श्रीमद्भोजराजेन्द्र ।
युष्मदस्मयोः षष्ठी चतुर्थी - द्वितीयाभिस्ते मे वाम्नौ ।
एषु चतुर्ष्वपकर्तरीत्यादिषु यादिषु तुबादिषु ।
पुनरपि भवति दिवादिषु परतो धातोः श्रीमद्भोजराजेन्द्र ।

(१९) भवेयुर्भोजभूपाऽऽशीः प्रेरणयोस्तुबादयः ।
धातोर्हि साधना सम्यक् अतः परं निरूप्यते ॥

(२०) आतोधातोलोपो० इत्यत्र भोज शब्दोपयोगः वर्तते ।
ईपि राजस्त्वलोपो हि वक्तव्यः कच्छभूपते ॥
यथा संज्ञो तथाऽन्येऽपि स्युः प्रयोगानुसारतः ॥

(२१) कच्छेश्वर ! यदादेशस्तद्वद्भवति चाऽनया ।
तत्सेरा सूत्रमित्यत्र प्राप्नोति परिभाषया ॥

(२२) कच्छजनपदाधीश ! देवादिति सुसिद्धये ।
देवाभ्यामथ देवेभ्यः पूर्ववत् साधना तयोः ॥

(२३) आबन्तात् पर एव स्यात् धिरि यथेति सिध्यति ।
आमन्त्रणे च हे गङ्गे कच्छजनपदप्रभो ॥

(२४) स्याद् भावे भवितव्यं यद् भवनीयं च कर्मणि ।
शुध्धधर्मश्च कर्तव्यः करणीयस्त्वया प्रभो ॥ (३-२०७) (पृ. ३३६)

(२५) प्रणम्यलोकेशमनन्तशक्तिं श्रीशारदाया वचनप्रसादात् ।
श्रीभारमल्लात्मजभोजतुष्ट्यै विरच्यते व्याकरणं सुपद्यैः ॥

(२६) श्रियेऽस्तु वः श्रीधरेव एक देवो नानाभिधानेन समग्रगामी ।
सन्नीलरत्नाधिककान्तिकान्तो नागाधिराजादिभिरेव सेव्यः ॥

(२७) शम्भुः सशक्तिः सकलः श्रिये स्यात्,
सुरासुरेन्द्रस्तुतपत्सरोजः,
सत्सिद्धिसंदर्भविधो समर्थः, सदोदय स्राक् सगुणो गणेशः ॥

(२८) मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि च शास्राणि प्रथन्ते-वीरपुरुषकाण्यायुष्मत्पुरुषाणि च भविष्यन्त्यध्येतारश्च प्रवक्तारो भविष्यन्ति (पातञ्जल महाभाष्यम्)

(२९) पृष्ठ - १६

(३०) पृष्ठानि - २, १३३, ३०१ यथाक्रमम् ।